# Government General Degree College at Ranibandh

## Rautora, Ranibandh, Bankura - 722135

## Sanskrit Department

## Study Material for Programme

## 2nd Year 4th Semester

## Paper – Manusamhita 7th Chapter & Ishopanishad (C1-D)

## Unit 1 - Manusamhita 7th Chapter

Explain into Sanskrit

"बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति ॥"

सन्दर्भः → महर्षिमनुविरचितायाः मनुसंहितायाः सप्तमाध्यायस्य राजधर्म-प्रकरणे समुपलभ्यते श्लोकोऽयम्।

प्रसङ्गनिर्देशः → श्लोकेऽस्मिन् राजानं प्रति प्रजानां व्यवहारः कीदृशः कर्तव्यः सोऽत्र वर्ण्यते।

सान्वयप्रतिपदार्थः → बालोऽपि बालकः सन्नपि, भूमिपः राजा मनुष्य इति मानुषः इति बुद्ध्या न अवमन्तव्यः न अवज्ञेयः। हि यतः एषा इयं महती देवता काचिद् विशाला देवता नररूपेण नरशरीरं परिगृह्य तिष्ठति विराजते इति सान्वयप्रतिपदार्थः।

व्याकरणगतटिप्पनी →

अवमन्तव्यः – अव-पूर्वात् मन् धातोः तव्य-प्रत्ययेन "अवमन्तव्यः" इति रूपम्।

नररूपेण – अत्र प्रकृत्यादित्वात् तृतीया भवति।

भावार्थः → पितुः अकालमरणाद् परमेव कश्चित् तस्य बालकपुत्रः राजपादम् अलंकरोति। स च खलु दण्डप्रयोगे समर्थः। अतः तस्य आदेशाः अलङ्घनीयाः। परमेश्वरः इन्द्र-वायु-यम-सूर्याग्नि-वरुण, चन्द्र-कुबेराणाञ्च अष्टदेवानां सारांशान् निहृत्य नृपम् असृजत्। अतः मनुना उक्तम् –

"इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः॥" इति।

अतः एतेषां देवानां सारभूतेन उपादानेन राज्ञः उत्पत्तिः। अतएव देवाः यथा अस्माकं प्रणम्याः, राजा अपि अस्माकं पूज्यः। राजा वयसा नवीनः अपि देवकल्पः, सदैव सः देववत् समाहरणीयः। बालकः राजा केनापि जनेन न अवमन्तव्यः, कदापि तस्य आदेशः न लङ्घनीयः। राज्ञः आदेशः लङ्घनीयः स्याच्चेद् दृष्टदोषः अदृष्टदोषः च जायते। (तयोर्हि मन्वर्थमुक्तावल्याम् उक्तम्) अतः राजा वृद्धो बालकः वा भवेत् सः सर्वथा सर्वैः पूज्यः। यतः महती एषा देवता काचित् मनुष्यरूपेण स्थिता इति। अतएव राज्ञः वयः अनपेक्ष्यं तस्य

(दीपिका ४/२१ पृ० २१०)

Scanned with CamScanner

देवशक्तिरिव ग्रहणीया, तस्य आदेशाः सदैव प्रजाभिः पालनीयाः इति सरलार्थः। इति शिवम्।

"एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम्॥"

सन्दर्भः → श्लोकोऽयं महर्षिमनुविरचितायाः मनुसंहितायाः सप्तमाध्यायस्य राजधर्मप्रकरणे समुपलभ्यते।

प्रसङ्गनिर्देशः → राज्ञः प्रतिकूलाचरणेन सम्भूतेन राजरोषेण सञ्जातं कुफलमात्र कथ्यते ऋषिणा।

सान्वयप्रतिपदार्थाः → अग्निः अनलः दुरुपसर्पिणम् समीपवर्तिनम् नरम् जनम् एकमेव एकाकिनमेव दहति दग्धं करोति। राजाग्निः क्रुद्धो राजारोषाग्निः सपशुद्रव्यसञ्चयम् गवाश्वादिपशुसुवर्णादि-धनसञ्चयसहितं कुलं पुत्रदारमित्रादिरूपं दहति भस्मीभूतं करोति इति सान्वयप्रतिपदार्थाः।

भावार्थः → अग्नेर्दाहिकाशक्तिः सुविदितैव। तेन शक्तिबलेन अग्निस्तस्य सन्निहितं सर्वमेव वस्तु दग्धुं क्षमते। परमग्निः दूरस्थितं वस्तुजातं व्यक्तिविशेषं वा दग्धुं न समर्थः। अपरम् तथ्य देवानां साराशान् आकृष्य परमेश्वरेण सृष्टो नृपः कार्यसिद्ध्यर्थम् अष्टदेवानां तेजांसि धारयति। तस्मात् कारणात् अग्नेर्दाहिकाशक्तिः राजरोषाग्नेर्दाहिकाशक्तिः बलवत्तरा। राजाग्निशब्देनात्र राजरोष एव विवक्षितः। राजनि क्रुद्धे सति राजरोषेण अपराधिनो जनस्य सर्वमेव विनाशतामेति। अनवधानतया अतिसमीपवर्तिनं जनमेकमेवाग्निर्दहति। तस्य पुत्र परिवारादिकं स्वजनं स्थावरजङ्गमात्मकं सम्पत्तिजातं चाग्निर्दग्धुं न प्रभवति। परं राजा यस्मै क्रुध्यति तेनैव जनेन सह तस्य पुत्रदारादय आत्मीयाः, गवाश्वादय पशवः, धन्यसुवर्णादीनि धनानि च राज्ञः रोषानलेन भस्मीभूतानि भवन्ति। तदुक्तं भाष्यकृता कुल्लूकभट्टेन - "क्रुद्धो राजाग्निः पुत्रदारभ्रात्रादिरूपं कुलमेव गवाश्वादिपशु- सुवर्णादिधनसञ्चयसहितं सापराधं निहन्ति।" इति। अतः सर्वेषां सर्वथा राजानुकूलाचरणेन राज्ञः सन्तोषविधानमेव कर्तव्यमिति।

व्याकरणगतटिप्पनी ⇒

राजाग्निः - राजा एव अग्निः इति विग्रहेण रूपककर्मधारयसमासे 'राजाग्निः' इति पदं सिध्यति।

दुरुपसर्पिणम् - दुः (दुष्टं) उपसर्पति यः सः दुरुपसर्पी, तम्, उपपदतत्पुरुषः समासः।

"यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः॥"

सन्दर्भः ⇒ महर्षिमनुविरचितायाः मनुसंहितायाः सप्तमध्यायस्य राजधर्मप्रकरणे समुपलभ्यते श्लोकोऽयं।

प्रसङ्गनिर्देशः ⇒ राज्ञः सर्वातिशायी प्रभावस्तथा अनन्यसुलभा तेजस्विता समुपवर्ण्यते अनेन श्लोकेन।

सान्वयप्रतिपदार्थाः ⇒ यस्य राज्ञः, प्रसादे अनुग्रहे, पद्मा महती श्रीः, सम्पद्, पराक्रमे शौर्ये, च विजयः जयः, क्रोधे कोपे च मृत्युः च मरणम्, वसति तिष्ठति, हि यतः, सः राजा, सर्वतेजोमयः अग्न्यादीनां देवतानां वीर्यमयः इति सान्वयप्रतिपदार्थाः।

व्याकरणगतटिप्पनी ⇒

प्रसादे - प्र-पूर्वात् सद्-धातोः घञ्-प्रत्ययेन 'प्रसादः' इति पदं निष्पन्नम्। अत्र अधिकरणे सप्तमीविभक्तिः स्यात्।

विजयः - वि-पूर्वात् जि-धातोः अच् प्रत्ययेन 'विजयः' इति रूपं भवति।

क्रोधे - क्रुध् + घञ्। अधिकरणे सप्तमी स्यात्।

भावार्थः ⇒ बहुगुणाधारस्तावत् परमेश्वरेण सृष्टो राजा। तस्य तेजस्विता अप्रमेया प्रभावश्च अपरिसीमः। राज्ञः एवं तेजस्वितायाः प्रभावश्च तस्य प्रसादे सति महती श्रीर्भवति। अतः सम्पत्लिप्सुना जनेन राजा सेव्यः; *शत्रुवधकामिना राजा आराधनीयः। यतः राज्ञः पराक्रमेण शत्रवः विजिताः भवन्ति। पुनश्च राजा यस्मै क्रुध्यति तस्य मृत्युरवश्यम्भावी। यतः ऋषिणा प्रागेव कथितं -

'कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम्।' इति। अतः धनार्थिनां जीवनार्थिनां जिगीषूणां वा सर्वदा सर्वथा राज्ञः सन्तोषः सम्पादनीयः इति भावः। *पुनः यस्य शत्रवः सन्ति तस्य शत्रुनाशार्थं राजा एव सेव्यः,

Scanned with CamScanner

"यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः।
शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः॥"

सन्दर्भः → महर्षिमनुविरचितायाः मनुसंहितायाः सप्तमाध्यायस्य राजधर्मप्रकरणे समुपलभ्यते श्लोकोऽयम्।

प्रसङ्गनिर्देशः → ~~स्वः~~ ~~स्व~~ सम्यगवहितो राजा यदि यथाशास्त्रं दण्डं न प्रणयेत्तर्हि समाजे कीदृशी विशृङ्खला समुपजायेतेति प्रतिपादितमस्मिन् श्लोके।

सान्वयप्रतिपदार्थः → यदि राजा नृपतिः चेत् अतन्द्रितः अनलसः सन् दण्ड्येषु अपराधिषु दण्डं न प्रणयेत् दण्डं न प्रयोजयेत् बलवत्तराः बलीयांसः दुर्बलान् हीनबलान् शूले ~~कन्टक~~ कन्टके मत्स्यान् इव मीनान् इव अपक्ष्यन् हिंसामकरिष्यन्।

व्याकरणगतटिप्पनी →

अतन्द्रितः - न तन्द्रितः इति विग्रहेण नञ् तत्पुरुष-समासे 'अतन्द्रितः' इति पदं सिध्यति।

अपक्ष्यन् - पच् + लृङ्, प्रथमपुरुषस्य बहुवचनम्।

भावार्थः → अपराधिनोऽपराधस्य गुरुत्वं विविच्यैव राज्ञा दण्डः प्रयोक्तव्यः। सार्थकप्रयुक्तो दण्डः समाजे अराजकतां दूरीकरोति। राजा यदि सम्यगनलसः सन् दण्डयोग्येषु दण्डं न प्रणयेत् तर्हि समाजे महती विशृङ्खला समुद्भवेत्, राष्ट्रे च सूचयेद् विपर्ययः। ~~[illegible]~~ दण्ड्येषु दण्डाभावाद् बलशालिनो दुर्बलानामुपरि यथेच्छमुत्पीडयेयुः। विषयोऽयं दृष्टान्तमुखेन विशदीक्रियते। शूले यथा मत्स्याः पच्यन्ते तथैव समाजे बलवन्तो जनाः दुर्बलान् अपक्ष्यन्। अर्थात् बलवन्तो दुर्बलान् हिंस्युरित्यर्थः।

'शूले मत्स्यान्' इत्यस्य 'जले मत्स्यान्' इति पाठान्तरं परिदृश्यते। तस्मिन् पाठे अयमर्थः लक्ष्यते - यथा जले महामत्स्याः क्षुद्रमत्स्यान् भक्षयन्ति, तथा राष्ट्रेऽपि बलवन्तः जनाः दुर्बलान् हिंस्युः इति मात्स्यन्यायः एव प्रवर्तते इति सरलार्थः।
प्रसङ्गेऽस्मिन् मनुमत्स्यकथायामपि उक्तम् -
'मत्स्य एव मत्स्यं गिलति ......।' इति।

---

"अद्यात् काकः पुरोडाशं श्वावलिह्याद्धविस्तथा ।
स्वाम्यञ्च न स्यात् कस्मिंश्चित् प्रवर्तेताधरोत्तरम् ॥"

प्रसङ्गनिर्देशः → मनुसंहितायाः सप्तमाध्याये दण्डप्रयोगवर्णनावसरे कथितोऽयं श्लोकः । राजा यदि यथाशास्त्रं दण्डं न प्रणयेत् तर्हि समाजे कीदृशी विशृङ्खला समुपजायते इति विवृतमस्मिन् श्लोके ।

सान्वयप्रतिपदार्थः → तथा तदा काकः वायसः पुरोडाशम् यज्ञीय-~~चि~~ पिष्टकम् अद्यात् अखादिष्यत् । श्वा कुक्कुरः हविः पायसादि हविः अवलिह्यात् अलक्ष्यत् । कस्मिंश्चित् कुत्रचित् स्वाम्यं स्वामित्वं न स्यात् ~~भवि~~ नाभविष्यत् । अधरोत्तरम् - ब्राह्मणादिवर्णेषु उच्चनीचविन्यासाभावः प्रवर्तते च पदम् अकरिष्यत् च इत्यर्थः ।

व्याकरणगतटिप्पणी →

अधरोत्तरम् - अधरं यत् तत् उत्तरम् इति विग्रहेण कर्मधारयसमासे 'अधरोत्तरम्' इति पदं सिध्यति ।

अद्यात् - अद् + लिङ् यात् ।

भावार्थः → राजकार्यसिद्ध्यर्थं सर्वप्राणिनां रक्षकः धर्मस्वरूपः ब्रह्मतेजोमयः दण्डः राज्ञः पूर्वमेव ब्रह्मणा निर्मितः । तस्य दण्डस्य भयादेव चराचराः सर्वे प्राणिनः स्वधर्मे नियुक्ताः स्वाधिकारभोगे च समर्थाः भवन्ति । यदि राजा अनलसः सन् यथायथं दण्डं न प्रणयेत् तर्हि न केवलं दुर्बलोपरि प्रबलस्य अत्याचारो दृश्यते तदा धर्मकार्यादिषु विघ्नोऽपि सञ्जायते । यथा काकः बहुयत्नसाध्यं यज्ञीयपिष्टकम् खादति तच्च अपवित्रं करोति । कुक्कुरः पायसादिहविर्लिह्यति । कुत्रापि कस्यापि प्रभुत्वं न दृश्यते । दण्डभयस्य अभावात् अधरोत्तरावस्था दृश्यते । उच्चो नीचो भवति, नीचो हि उच्चो भवति । कुल्लूकभट्टेनोक्तम् -
"ततो बलिना तद्ग्रहणाद् ब्राह्मणादिवर्णानां च मध्ये यदधरं शूद्रादि ~~त~~ तदेवोत्तरं प्रधानं प्रावर्तिष्यत् ।" इति ।
अतः राजा राज्यरक्षार्थं सर्वथा अनलसः सन् यथाविधि दण्डं विदध्यात् इति सरलार्थः ।

---

Scanned with CamScanner

"एवं वृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः ।
विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥" इति ।

<u>प्रसङ्गनिर्देशः</u> → दारिद्र्येण कालं नयतोऽपि राज्ञो यशोराशिभिः पृथिवी परिव्याप्ता भवतीति श्लोकेऽस्मिन् वर्णितम् ।

<u>सान्वयप्रतिपदार्थः</u> → शिलोञ्छेन अपि क्षीणकोषेण अपि जीवतः जीविकानिर्वाहं कुर्वतः एवं वृत्तस्य अनेन उपायेन जीवितस्य नृपतेः राज्ञः यशः कीर्तिः लोके जगति अम्भसि जले तैलबिन्दुरिव तैलकणा इव विस्तीर्यते विस्तारं लभते इति सान्वयप्रतिपदार्थः ।

<u>व्याकरणगतटिप्पणी</u> →

शिलोञ्छेन - शिलश्च उञ्छश्च इति शिलोञ्छम्, अत्र समाहारद्वन्द्व समासः, तेन ।

विस्तीर्यते - वि-पूर्वात् स्तॄ-धातोः लटि प्रथमपुरुषैकवचने कर्मकर्तृवाच्ये 'विस्तीर्यते' इति रूपं निष्पन्नम् ।

<u>भावार्थः</u> → नृपतेरादर्शगुणावलीवर्णनप्रसङ्गे धर्मशास्त्रकारेणोक्तं यत् स्वराज्ये राजा यथाशास्त्रानुसारं, शत्रुषु दण्डपरायणो मित्रेष्वकुटिलो ब्राह्मणेषु च क्षमावान् भवेत् । एवं सति नृप एव सुशासकरूपेण परिगण्यते । न चापरः कश्चित् । अतः मनुना उक्तम् -

"स्वराष्ट्रे न्यायवृत्तः स्याद् भृशदण्डश्च शत्रुषु ।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥" इति ।

एतादृशो गुणोपेतो राजा यथार्थमेव चरित्रवान् । शिलवृत्तिना उञ्छवृत्तिना च जीविकां निर्वाहयतोऽपि चरित्रवतो राज्ञः सुकृतिजनितेन यशसा जगत् परिव्याप्तं भवति । शस्यक्षेत्रे मञ्जर्यात्मकानेकधान्योच्चयनं शिलः । तत्र एकैकधान्यादिगुडकोच्चयनं तावदुञ्छः । शिलवृत्तिना उञ्छवृत्तिना चात्र राज्ञो विभवहीनत्वं तथा हीनकोषत्वमेव समभिव्यञ्जितम् । जले पतितस्तैलबिन्दुरनायासेन समग्रे जले व्याप्तो भवति । तथैव महता दारिद्र्येण कालमति- ~~वाहयतोऽपि समग्रे जले व्याप्तो भवति । तथैव महता दारिद्र्येण~~ कालमतिवाहयतोऽपि चरित्रवतो राज्ञो यशस्तैलबिन्दुरिव जगति व्याप्तं भवति । अतः प्रजानुरञ्जकेन राज्ञा सर्वथा चरित्रवतैव भवितव्यमिति शिवम् ।

---

Scanned with CamScanner

"अतस्तु विपरीतस्य नृपतेराजितात्मनः।
संक्षिप्यते यशोलोके घृतबिन्दुरिवाम्भसि॥"

**प्रसङ्गनिर्देशः** → राजगुणविच्युतस्य राज्ञोऽकीर्तिणा जगत् परिव्याप्तं भवतीति श्लोकेऽस्मिन् वर्णितम्।

**सान्वयप्रतिपदार्थाः** → अतः अस्मात् अजितात्मनः अजितेन्द्रियस्य विपरीतस्य विरुद्धधर्मवतः तु किन्तु नृपतेः राज्ञः यशः कीर्तिः लोके जगति अम्भसि जले घृतबिन्दुरिव आज्यकणा इव संक्षिप्यते संकोचमेति।

**व्याकरणटिप्पनी** →

संक्षिप्यते - सम् - पूर्वात् क्षिप् - धातोः लटि प्रथम पुरुषैकवचने कर्मकर्तृवाच्ये 'संक्षिप्यते' इति रूपं निष्पन्नम्।

घृतः - घृ + क्त।

**भावार्थः** → नृपतेरादर्शगुणावलीवर्णनप्रसङ्गे धर्मशास्त्रकारेणोक्तं यत् स्वराज्ये राजा यथाशास्त्रानुसारी, शत्रुषु दण्डपरायणो मित्रेष्वकुटिलो ब्राह्मणेषु च क्षमावान् भवेत्। एवं सति स नृप एव सुशासकरूपेण परिगण्यते। न चापरः कश्चित्। अतः मनुना उक्तम् -

"स्वराष्ट्रे न्यायवृत्तः स्याद् भृशदण्डश्च शत्रुषु।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः॥" इति।

एतादृशो गुणोपेतो राजा यथार्थमेव चरित्रवान्। गुणैरेभिर्विरहितो नृपोऽसंयतरूपेण विविच्यते। एतादृशस्य असंयतेन्द्रियस्य नृपस्य यत्किञ्चित् सुकृतिजनितं यशो जगति न कदापि प्रसृतं भवति। परं तत् क्रमेण संकोचमेति। इदमेव दृष्टान्तमुखेन विशदीक्रियते, जले पतितो घृतबिन्दुः समग्रे जले अव्यापृतः सन् एकस्मिन् स्थाने स्थिरीभवति। सम्मेव ~~जले अव्यापृतः जले अव्याप~~ अवस्था भवति चरित्रहीनस्य असंयतस्य नृपस्य यशसः। नृपस्य एतादृशस्य यशो जगति जले घृतबिन्दुरिव क्रमेण संकोचमेति। वस्तुतः संयमरहितस्य नृपतेर्यशो न कदापि लोके प्रचारितं भवति, परं तस्य अपकीर्तिना जगत् परिव्याप्तं भवतीति तात्पर्यम्।

---

Scanned with CamScanner

"त्रैविद्येभ्यस्त्रयीं विद्याद् दण्डनीतिञ्च शाश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भांश्च लोकतः ॥"

**प्रसङ्गनिर्देशः** → विनयसंयमादीनां शिक्षार्थं राज्ञा कीदृशेभ्यो जनेभ्यः कीदृशी शिक्षा ग्रहणीया इत्यस्मिन् श्लोके विवृतम् ।

**सान्वयप्रतिपदार्थः** → त्रयीं ऋग्-यजुः-सामाख्यं वेदत्रयम् त्रैविद्येभ्यः वेदज्ञेभ्यः विद्यात् शिक्षेत् । शाश्वतीं चिरन्तनीं दण्डनीतिम् राजनीतिम् आन्वीक्षिकीं च तर्कविद्यां च आत्मविद्यां ब्रह्मविद्यां च वार्ता कृषिवाणिज्य पशुपालनादि वार्ताः आरम्भान् च धनोपायार्थान् च लोकतः तद्विशेषेभ्यः कर्षकादिजनेभ्यः ( विद्यात् शिक्षेत् ) इत्यर्थः ।

**व्याकरणगतटिप्पनी** →

दण्डनीतिम् – दण्डस्य नीतिः इति दण्डनीतिः, अत्र षष्ठीतत्पुरुषसमासः ।

लोकतः – लोक + तसिल् ।

**भावार्थः** → विनयविरहिताः राजानः विनाशम् आप्नुवन्ति विनयिनश्च समृद्धिं लभन्ते इत्युक्तं पूर्वमेव । अतः विविधेभ्यो विद्वद्भ्यो राज्ञा विविधेषु विषयेषु शिक्षा अभ्यसनीया । ऋक्सामयजुषां वेदानां समाहारः त्रयीशब्देन ~~उच्य~~ उच्यते । अस्मिन् वेदत्रितये निष्णातेभ्यः जनेभ्यः ब्रह्मचर्यावस्थायां राज्ञा त्रयी प्रशिक्ष्येत । दण्डनीतिर्नामार्थशास्त्रम् । अलब्धविषयाणां लाभोपायस्तथा लब्धविषयस्य रक्षणोपायः समुपदिष्टः शास्त्रेऽस्मिन् । आन्वीक्षिकीशब्देन तर्कविद्या बोध्यते । कौटिल्येन उक्तम् – "सांख्यं योगो लोकायतञ्चेत्यान्वीक्षिकी ।" इति । अत उपलक्षणेन सर्वाणि एव दर्शनशास्त्राणि आन्वीक्षिकीपदेन व्यपदिश्यन्ते इत्यस्माकं मतिः । आत्मविद्यापदेन उपनिषत्प्रतिपादिता ब्रह्मविद्या एव बोध्या । कृषिपशुपालनवाणिज्यादिविषयकं शास्त्रं तावद् वार्ता । एतासु विद्यासु ये खलु पारङ्गतास्तेभ्यो राज्ञा एतानि शास्त्राणि शिक्षणीयानि । एवं वेदत्रितयं दण्डनीतिरान्वीक्षिकी आत्मविद्या वार्ता चेति विषयेषु नृपतेर्ज्ञानपरिश्रमः ।

---

Scanned with CamScanner

Write Shorts Notes

## तौर्यत्रिकम् →

मनुना मनुसंहितायाः सप्तमाध्याये राजधर्मप्रकरणे राज्ञः व्यसनं निरूपितम्। तद्व्यसनं कामजक्रोधजभेदेन द्विधा विभक्तम्। अत्र कामजव्यसनं दशविधम्। तदुक्तम् मनुना –

"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः।" इति।

दशकामजव्यसनेष्वन्यतमं तावत् तौर्यत्रिकम्। तुर्यं मुरजादि, तत्र भव इत्यर्थे 'तत्र भवः' इत्यनेन अणि तौर्यमिति। तौर्याणां त्रिकं तौर्यत्रिकमिति। त्रयोऽंशा यस्य तदिति विग्रहे त्रिशब्दात् 'संख्याया अतिशदन्तायाः कन्' इत्यनेन कन्प्रत्यये त्रिकमिति निष्पन्नम्। अतः तौर्यत्रिकशब्देन नृत्यगीतवाद्यानां त्रयाणां ग्रहणम्। तद्भाषितं भाष्ये कुल्लूकभट्टेन – 'तौर्यत्रिकं नृत्यगीतवादित्राणि' इति। अमरकोषेऽपि अनुरूपं प्रोक्तं – 'तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम्।' इति।

---

## जाङ्गलदेशः →

आचार्यमनुना मनुसंहितायां राजधर्मप्रकरणे राजकृत्यानि निरूपितानि। प्रसङ्गसङ्गत्या तत्र राजधानीस्थापनस्थानमपि प्रपञ्चितम् – "जाङ्गलं शस्यसम्पन्नमार्यप्रायमनाविलम्।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत्॥" इति।

श्लोकस्थोऽयं जाङ्गलदेशो विविधार्थद्योतकः। तथाहि वाचस्पत्याम्-रण्ये आरण्यके पशुमांसे तत्रत्योदके चास्य शब्दस्य प्रयोगो दृश्यते। कुल्लूकभट्टमते –

"अल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः।
स ज्ञेयो जाङ्गलो देशः ------ ॥" इति।

अर्थात् यत् स्थानम् अल्पोदकतृणान्वितं तथा प्रवातयुतं प्रचुरातपोपेतञ्च तत् जाङ्गलस्थानम्। राजनीतिप्रकाशेऽपि अनुरूपं प्रोक्तम् – "स्वल्पोदकपर्वतो बहुपक्षिमृगः प्रचुरवर्षातपश्च जाङ्गलो देशः।" इति।

---

Scanned with CamScanner

षाड्गुण्यम् →

क्षत्रियाणां परो धर्मः प्रजानामेव पालनम्। तत्पालनं तु योगक्षेमसाध्यम्। तदर्थं राज्ञा अवश्यमेव षाड्गुण्यं प्रयोक्तव्यम्। अतो मनुना मनुसंहितायां राज्ञः कृते षड्गुणचिन्तनविषये उक्तम् –

"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा॥" इति।

मनुना षड्गुणस्वरूपविषये अधिकं किमपि नोक्तम्। परमेतद्विषये कुल्लूकभट्टेन उक्तम् –"तत्रोभयानुग्रहार्थं हस्त्यश्वरथहिरण्यादिनिबन्धनेन आवाभ्याम् अन्योन्यस्यापकर्तव्यमिति नियमबन्धः सन्धिः वैरं विग्रहचार-णाद्याधिक्येन, यानं शत्रुं प्रति गमनं उपेक्षणमासनं, स्वार्थसिद्धये बलस्य द्विधाकरणं द्वैधीभावः। शत्रुपीडितस्य प्रबलतरराजान्तराश्रयणं संश्रयः।" इति।

राजा आत्मरक्षार्थमेतान् प्रणयेत्। राज्ञः उपकारकत्वाद् एते गुणा इत्युच्यन्ते। यथायथं विचार्यैव राजा एकैकशः एतेषां प्रयोगं कुर्यात्। परराष्ट्रनीतिरपि षड्गुणाश्रयिण्येव। षड्गुणास्ते प्रत्येकं द्विधा विभक्ताः। तदुक्तं मनुना –

"सन्धिस्तु द्विविधं विद्याद्राजा विग्रहमेव च।
उभे यानासने चैव द्वैधं संश्रयमेव च॥" इति।

ब्राह्मसंस्कारः →

मनुना मनुसंहितायाः सप्तमाध्याये राज्ञः प्रजापालन-रूपधर्मः व्याख्यातः। प्रजापालनं हि राज्ञः परमं कर्तव्यम्। तच्च वैदिकधर्मानुसारमेव कर्तव्यम्। तदुक्तं मनुना –

"ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्॥" इति।

ब्राह्मसंस्कारशब्दस्यात्र विशेषार्थः स्वीकृतः। ब्राह्म संस्कारश्चेति अत्र पदद्वयम्। अत्र ब्राह्मशब्दस्य 'वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः' इति अमरकोषवचनाद् वेद इत्यर्थः। वेदज्ञानलाभाय उपनयनादिकं संस्कारपदेन बोध्यते। तथाहि मनुटीकाकृतं मेधातिथिकुल्लूकभट्टनारायणगोविन्दराजानां मते उपनयनः एव ब्राह्मसंस्कारः।

Scanned with CamScanner

আন্বীক্ষিকী ⇒

রাজা কোন্ কোন্ শিক্ষা অর্জন করবেন সেই প্রসঙ্গে 'আন্বীক্ষিকী' এর উল্লেখ করেছেন মনুসংহিতাকার মনু। –

"ত্রৈবিদ্যেভ্যস্ত্রয়ীং বিদ্যাদ্ দণ্ডনীতিঞ্চ শাশ্বতীম্।
আন্বীক্ষিকীঞ্চাত্মবিদ্যাং বার্তারম্ভাংশ্চ লোকতঃ।"

'আন্বীক্ষিকী' শব্দটির সাধারণ অর্থ উক্তি প্রত্যুক্তিমূলে প্রতিপাদিত তর্কবিদ্যা। কৌটিল্যের মতে সাংখ্য, যোগ ও লোকায়ত, তিনটি শাস্ত্রই আন্বীক্ষিকীর অন্তর্ভুক্ত। –

"সাংখ্যং যোগং লোকায়তঞ্চেত্যান্বীক্ষিকী।"

এই আন্বীক্ষিকীকে সমস্ত বিদ্যার প্রদীপস্বরূপ, সমস্ত কর্মের উপায়স্বরূপ এবং সমস্ত ধর্মের আশ্রয় স্বরূপ বলা হয়েছে।

"প্রদীপঃ সর্ববিদ্যানামুপায়ঃ সর্বকর্মণাম্।
আশ্রয়ঃ সর্বধর্মাণাং শশ্বদান্বীক্ষিকী মতা॥"

গৌতম, যাজ্ঞবল্ক্য প্রভৃতি স্মৃতিশাস্ত্রকারদের মতে আন্বীক্ষিকী হল তর্কবিদ্যা। কামন্দকীয় নীতিসারে 'আন্বীক্ষিকী' শব্দের দ্বারা আত্মবিদ্যাকে বোঝানো হয়েছে। মেধাতিথির মতে আন্বীক্ষিকী তর্কবিদ্যা ও অর্থশাস্ত্র উভয়ই। সুতরাং উপলক্ষণ দ্বারা ব্যাপকতর অর্থে সকল দর্শনশাস্ত্রকেই আন্বীক্ষিকী বিদ্যারূপে গণ্য করা হয়।

---

পৈশুন্যম ⇒

আচার্য মনু মনুসংহিতায় যে আটপ্রকার ক্রোধজ ব্যসনের নাম উল্লেখ করেছেন তার মধ্যে 'পৈশুন্য' অন্যতম।

"পৈশুন্যং সাহসং দ্রোহ ঈর্ষ্যাসূয়ার্থদূষণম্।
বাগ্দণ্ডজঞ্চ পারুষ্যং ক্রোধজোঽপি গণোঽষ্টকঃ॥"

কারো প্রতি ক্রোধের বশে তার অজ্ঞাত দোষ উদ্ভাবন করে প্রকাশ করাকে পৈশুন্য বলে। 'পিশুন' শব্দের অর্থ খল, তার ভাব পৈশুন্য অর্থাৎ খলতা। কুল্লুকের মতে –

'পৈশুন্যমবিজ্ঞাতদোষাবিষ্করণম্।'

---